शास्त्री-Iखण्ड साहित्य

# अभिज्ञानशाकुन्तलम्

## पञ्चमोऽङ्कः

प्र०-(1)- पद्यमिदम् व्याख्येयम् ।
अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम् ॥

उत्तरम् :- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति।

व्याख्या:- अस्मिन् श्लोके शकुन्तलयाऽनया बन्धुवर्गमनापृच्छ्य राज्ञाऽनेन सार्कं कृतस्य गान्धर्वविवाहस्य निराकरणरूपं फलं विलोक्य कुपितः शारङ्गरवः नीतिं कथयति — अतः = अस्मात् कारणात् यस्माच्चापलं दहति तस्मादित्यर्थः, रहः = संगतम् = दूढमैत्री एकान्ते समागमः, गान्धर्व विवाहात्मकं सख्यम्, विशेषात् परीक्ष्य-येन संगतं कुर्यात् तस्य मनोविशेषरूपेण परीक्ष्य कर्तव्यम् अनुष्ठेयम्, अज्ञातं = व्यवहारादिना अविदितं हृदयं चित्तं येषां ते तेषु अज्ञातहृदयेषु = पूर्वव्यवहारादिना अज्ञातचित्तवृत्तिषु अपरिज्ञातशीलेषु कृतं सौहृदं = मैत्री एव वैरी भवति = परिणामे वैरायते पीडाकरं जायते। यद्वा अतः = अस्मात् कारणात् कर्तव्यं करणीयं कार्यं परीक्ष्य इष्टैः सह सम्यग् आलोच्य कर्तव्यम् एकान्तसख्यं तु विशेषतः परीक्ष्य कर्तव्यम् ।

Renu Devi
29/10/20
छात्रा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री-प्र खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

प्र० (1) – प्रलीन भूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥

उत्तरम् :– प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितः किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति

व्याख्या :– सः = वह (दुर्योधन) । प्रलीनभूपालं = समाप्त हो गये हैं अन्य राजा जिसमें ऐसे । (और) स्थिरायति = (स्थिर =) निश्चित है (आयति =) भविष्य जिसमें ऐसे । आवारिधि = समुद्रपर्यन्त, भुवः मण्डलं = पृथ्वी मँडल को प्रशासद् अपि = शासन करता हुआ भी । त्वद् = तुमसे । एष्यतीः = आनेवाली । भियः = भीतियों (डरों) को । चिन्तयत्येव = सोचता ही है। अहो = आश्चर्य है। बलवद्विरोधिता = बलवान् के साथ विरोध होना । दुरन्ता = दुष्कर है।

Renu Devi
29/10/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री - II खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

प्र० (1) - कस्मात् श्रीरामः सीतां परित्यक्तवान् ?

उत्तरम् - कलत्र निन्दासंतप्तत्वात् ।

प्र० - (2) - कमादिदेश श्रीरामः सीतां वने परित्यक्तुम् ?

उत्तरम् - लक्ष्मणम् ।

प्र० (3) - कस्याश्रमस्य सविधे सीतां परित्यक्तुमाह श्रीरामः लक्ष्मणम् ?

उत्तरम् - महर्षेः वाल्मीकेः आश्रमस्य सविधे ।

प्र० (4) - प्रस्थिते लक्ष्मणे वने परित्यक्ता सीता किं चकार ?

उत्तरम् - सा करुणक्रन्दनं कृतवती ।

प्र० (5) - केन श्लोकेन द्वारा महर्षेः वाल्मीकेः व्याधेन क्रौञ्चहननजन्यः शोकः श्लोकरूपेण व्यक्तोऽभवत् ?

उत्तरम् - मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ इति श्लोकेन द्वारा ॥

प्र० (6) - वने परित्यक्तायाः सीतायाः सविधेसमागतो महर्षिः वाल्मीकिः किमाह सीताम् ?

उत्तरम् - जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा ।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि! पितुर्निकेतम् ॥

Renu Devi
29/10/20

राधा उमाकान्त सं० महाविद्यालय खसेना
पूर्णिया ।